# Natya Shastra Chapter 35

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૫

## Document Information

Text title : naaTyashaastra adhyaaya 35

File name : natya35.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : hareshbakshi at hotmail.com

Proofread by : hareshbakshi at hotmail.com

Latest update : March 4, 2003

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 18, 2025

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૩૫

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ પઞ્ચત્રિંશોઽધ્યાયઃ ।
વિન્યાસં ભૂમિકાનાં ચ સમ્પ્રવક્ષ્યામિ નાટકે ।
યાદૃશો યસ્ય કર્તવ્યો વિન્યાસો ભૂમિકાસ્વથ ॥ ૧ ॥

ગતિવાગઙ્ગચેષ્ટાભિઃ સત્ત્વશીલસ્વભાવતઃ ।
પરીક્ષ્ય પાત્રં તજ્જ્ઞસ્તુ યુઞ્જ્યાદ્ ભૂમિનિવેશને ॥ ૨ ॥

તસ્મિન્નન્વિષ્ય હિ ગુણવાન્ કાર્યા પાત્રસમાશ્રયા ।
ન ખેદજનનં બુદ્ધેરાચાર્યસ્ય ભવિષ્યતિ ॥ ૩ ॥

આચાર્યઃ પાત્રજાંશ્ચૈવ ગુણાઞ્જ્ઞાત્વા સ્વભાવજાન્ ।
તતઃ કુર્યાદ્ યથાયોગં નૃણાં ભૂમિનિવેશનમ્ ॥ ૪ ॥

અઙ્ગપ્રત્યઙ્ગસંયુક્તમહીનાઙ્ગં વયોન્વિતમ્ ।
ન સ્થૂલં ન કૃશં ચૈવ ન દીર્ઘં ન ચ મન્થરમ્ ॥ ૫ ॥

શ્લિષ્ટાઙ્ગં દ્યુતિમન્તં ચ સુસ્વરં પ્રિયદર્શનમ્ ।
એતૈર્ગુણૈશ્ચ સંયુક્તં દેવભૂમિષુ યોજયેત્ ॥ ૬ ॥

સ્થૂલં પ્રાંશું બૃહદ્દેહં મેઘગમ્ભીરનિસ્વનમ્ ।
રૌદ્રસ્વભાવનેત્રં ચ સ્વભાવભ્રુકુટીમુખમ્ ॥ ૭ ॥

રક્ષોદાનવદૈત્યાનાં ભૂમિકાસુ પ્રયોજયેત્ ।
પુરુષાણાં પ્રયોગસ્તુ તથાઙ્ગક્રિયયાન્વિતઃ ॥ ૮ ॥

સુનેત્રસુભ્રુવઃ સ્વઙ્ગાઃ સુલલાટાઃ સુનાસિકાઃ ।
સ્વોષ્ઠાઃ સુગણ્ડાઃ સુમુખાઃ સુકણ્ઠાઃ સુશિરોધરાઃ ॥ ૯ ॥

સ્વઙ્ગપ્રત્યઙ્ગસંયુક્તા ન દીર્ઘા ન ચ મન્થરાઃ ।

ન સ્થૂલા ન કૃશાશ્ચૈવ સ્વભાવેન વ્યવસ્થિતાઃ ॥ ૧૦ ॥

સુશીલા જ્ઞાનવન્તશ્ચ તથા ચ પ્રિયદર્શનાઃ ।
કુમારરાજભૂમૌ તુ સંયોજ્યાશ્ચ નરોત્તમાઃ ॥ ૧૧ ॥

અઙ્ગૈરવિકલૈર્ધીરં સ્ફુટં વસનકર્મણિ ।
ન દીર્ઘં નૈવ ચ સ્થૂલમૂહાપોહવિચક્ષણમ્ ॥ ૧૨ ॥

અદીનં ચ પ્રગલ્-ભં ચ પ્રત્યુત્પન્નવિનિશ્ચયમ્ ।
સેનાપતેરમાત્યાનાં ભૂમિકાસુ પ્રયોજયેત્ ॥ ૧૩ ॥

પિઙ્ગાક્ષં ઘોણનાસં ચ નેત્રમુચ્ચમથાપિ વા ।
કઞ્ચુકિશ્રોત્રિયાદીનાં ભૂમિકાસુ નિયોજયેત્ ॥ ૧૪ ॥

એવમન્યેષ્વપિ તથા નાટ્યધર્મવિભાગતઃ ।
દેશવેષાનુરૂપેણ પાત્રં યોજ્યં સ્વભૂમિષુ ॥ ૧૫ ॥

મન્થરં વામનં કુબ્જં વિકૃતં વિકૃતાનનમ્ ।
વિષ્ટબ્ધનેત્રં કાણાક્ષં સ્થૂલં ચિપિટનાસિકમ્ ॥ ૧૬ ॥

દુર્જનં દુસ્વભાવં ચ વિકૃતાચારમેવ ચ ।
દાસભૂમૌ પ્રયુઞ્જીત બુધો દાસાઙ્ગસમ્ભવમ્ ॥ ૧૭ ॥

પ્રકૃત્યાઽતિકૃશં ક્ષામં તપઃશ્રાન્તેષુ યોજયેત્ ।
તથા ચ પુરુષં સ્થૂલમુપરોધેષુ યોજયેત્ ॥ ૧૮ ॥

યદિ વા નેદૃશાઃ સન્તિ પ્રકૃત્યા પુરુષા દ્વિજાઃ ।
આચાર્યબુદ્ધ્યા યોજ્યાસ્તુ ભાવચેષ્ટાસ્વભાવતઃ ॥ ૧૯ ॥

યા યસ્ય સદૃશી ચેષ્ટા હ્યુત્તમાધમમધ્યમા ।
સ તથાઽઽચાર્યયોગેન નિયમ્યા ભાવભાવિની ॥ ૨૦ ॥

અતઃ પરં પ્રવક્ષ્યામિ ભરતાનાં વિકલ્પનમ્ ।
ભરતાશ્રયાશ્ચ ભરતો વિદૂષકઃ સૌરિકસ્તથા નાન્દી ।
નન્દી સસૂત્રધારો નાટ્યરસો નાયકશ્ચૈવ ॥ ૨૧ ॥

મુકુટાભરણવિકલ્પૌ વિજ્ઞેયો માલ્યવસ્તુવિવિધૈશ્ચ ।
કારકકુશીલવાદ્યા વિજ્ઞેયા નામતશ્ચૈવ ॥ ૨૨ ॥

ધુર્યવદેકો યસ્માદુદ્ધારોઽનેકભૂમિકાયુક્તઃ ।
ભાણ્ડગ્રહોપકરણૈનાટ્યં ભરતો ભવેત્ તસ્માત્ ॥ ૨૩ ॥

લોકાહૃદાશ્રયકૃતા સર્વપ્રકૃતિપ્રચારસંયુક્તા ।
નાનાશ્રયાં પ્રકુરુતે તથા ચ નારી તુ સર્વત્ર ॥ ૨૪ ॥

પ્રત્યુત્પન્નપ્રતિભો નર્મકૃતો નર્મગર્ભનિર્ભેદઃ ।
છેદવિદૂષિતવચનો વિદૂષકો નામ વિજ્ઞેયઃ ॥ ૨૫ ॥

તૂર્યતિસ્તુ નરઃ સર્વાતોદ્યપ્રવાદને કુશલઃ ।
તૂરપરિગ્રહયુક્તો વિજ્ઞેયસ્તૌરિકો નામ ॥ ૨૬ ॥

નટનૃતિ ધાત્વર્થોઽયં ભૂતં નાટયતિ લોકવૃત્તાન્તમ્ ।
રસભાવસત્વયુક્તં યસ્માત્ તસ્માન્નટો ભવતિ ॥ ૨૭ ॥

સ્તુત્યભિવાદનકૃતૈર્મધુરૈર્વાક્યૈઃ સુમઙ્ગલાચારૈઃ ।
સર્વ સ્તૌતિ હિ લોકં યસ્માત્ તસ્માદ્ભવેદ્વાદી ॥ ૨૮ ॥

ભાવેભ્યો બહુધાઽસ્મિન્ રસા વદતિ નાટ્યયોગેષુ ।
પ્રાકૃતસંસ્કૃતપાઠ્યો નન્દી નામેતિ સ જ્ઞેયઃ ॥ ૨૯ ॥

ગીતસ્ય ચ વાદ્યસ્ય ચ પાઠ્યસ્ય ચ નૈકભાવવિહિતસ્ય ।
શિષ્ટોપદેશયોગાત્ સૂત્રજ્ઞઃ સૂત્રધારસ્તુ ॥ ૩૦ ॥

યસ્માત્ યથોપદિષ્ટાન્ રસાંશ્ચ ભાવાંશ્ચ
સત્વસંયુક્તાન્ ।
ભૂમિવિકલ્પૈર્નયતિ ચ નાટ્યકરઃ કીર્તિતસ્તસ્માત્ ॥ ૩૧ ॥

ચતુરાતોદ્યવિધાનં સર્વસ્ય તુ શાસ્ત્રખે દવિહિતસ્ય ।
નાટ્યસ્યાન્તં ગચ્છતિ તસ્માદ્વૈ નાયકોઽભિહિતઃ ॥ ૩૨ ॥

નાનાપ્રકૃતિસમુત્થં કરોતિ યઃ શીર્ષકં મુકુટયોગે ।
વિવિધૈર્વેષવિશેષૈઃ સ ચ કુટકારસ્તુ વિજ્ઞેયઃ ॥ ૩૩ ॥

ભાણ્ડકવાદ્યજ્ઞા યા લયતાલજ્ઞા રસાનુવિદ્ધા ચ ।
સર્વાઙ્ગસુન્દરી વૈ કર્તવ્યા નાટકીયા તુ ॥ ૩૪ ॥

યસ્ત્વાભરણં કુર્યાદ્ બહુવિધવિહિતં સ ચાભરણઃ ।
યશ્ચોપકરણયોગાત્ સ તેન નામ્નાઽભિધાતવ્યઃ ॥ ૩૫ ॥

યો વૈ માલ્યં કુરુતે પઙ્ચવિધં માલ્યાકૃત્ સ વિજ્ઞેયઃ ।
યશ્ચાપિ વેષયોગં કુરુતે સ ચ વેષકારી તુ ॥ ૩૬ ॥

ચિત્રજ્ઞશ્ચિત્રકરો વસ્ત્રસ્ય રઞ્જાનાત્તથા રજકઃ ।
જત્વશ્મલોહકાષ્ઠૈર્દ્રવ્યકરૈઃ કારુકશ્ચૈવ ॥ ૩૭ ॥

નાનાતોદ્યવિધાને પ્રયોગયુક્તઃ પ્રવાદને કુશલઃ ।
અતોદ્યેઽપ્યતિકુશલો યસ્માત્ સ કુશલવો જ્ઞેયઃ ॥ ૩૮ ॥

યદ્યત્ સમાશ્રયન્તે શિલ્પં વા કર્મ વા પ્રયોગં વા ।
તનૈવોપગતગુણા વિજ્ઞેયા નામતઃ પુરુષાઃ ॥ ૩૯ ॥

એવં તુ નાટકવિધૌ જાતિર્નટસંશ્રયા બુધૈર્જ્ઞેયા ।
નાટ્યોપકરણયુક્તા નાનાશિલ્પપ્રસક્તા ચ ॥ ૪૦ ॥

ઉક્તોઽત્ર ભૂમિકાન્યાસઃ પ્રયોક્તારશ્ચ યોગતઃ ।
આદિષ્ટં નાટ્યશાસ્ત્રં ચ મુનયઃ કિમિહોચ્યતામ્ ॥૪૧ ॥

ઇતિ ભરતીયે નાટ્યશાસ્ત્રે ભૂમિકાવિકલ્પાધ્યાયઃ પઞ્ચત્રિંશઃ ॥ ૩૫ ॥

Encoded by Haresh BakShi hareshbakShi@hotmail.com

*Natya Shastra Chapter 35*
pdf was typeset on March 18, 2025

Please send corrections to *sanskrit@cheerful.com*